# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय १६

स जित्वा भ्रातरं राम धनदं राक्षसाधिपः ।
महासेनप्रसूतिं तु ययौ शरवणं ततः ॥ १॥

अथापश्यद्दशग्रीवो रौक्मं शरवणं तदा ।
गभस्तिजालसंवीतं द्वितीयमिव भास्करम् ॥ २॥

पर्वतं स समासाद्य किं चिद्रम्यवनान्तरम् ।
अपश्यत्पुष्पकं तत्र राम विष्टम्भितं दिवि ॥ ३॥

विष्टब्धं पुष्पकं दृष्ट्वा कामगं ह्यगमं कृतम् ।
राक्षसश्चिन्तयामास सचिवैस्तैः समावृतः ॥ ४॥

किमिदं यन्निमित्तं मे न च गच्छति पुष्पकम् ।
पर्वतस्योपरिस्थस्य कस्य कर्म त्विदं भवेत् ॥ ५॥

ततोऽब्रवीद्दशग्रीवं मारीचो बुद्धिकोविदः ।
नैतन्निष्करणं राजन्पुष्पकोऽयं न गच्छति ॥ ६॥

ततः पार्श्वमुपागम्य भवस्यानुचरो बली ।
नन्दीश्वर उवाचेदं राक्षसेन्द्रमशङ्कितः ॥ ७॥

निवर्तस्व दशग्रीव शैले क्रीडति शङ्करः ॥ ८॥

सुपर्णनागयक्षाणां दैत्यदानवरक्षसाम् ।
प्राणिनामेव सर्वेषामगम्यः पर्वतः कृतः ॥ ९॥

स रोषात्ताम्रनयनः पुष्पकादवरुह्य च ।
कोऽयं शम्रक इत्युक्त्वा शैलमूलमुपागमत् ॥ १०॥

नन्दीश्वरमथापश्यदविदूरस्थितं प्रभुम् ।
दीप्तं शूलमवष्टभ्य द्वितीयमिव शङ्करम् ॥ ११॥

स वानरमुखं दृष्ट्वा तमवज्ञाय राक्षसः ।
प्रहासं मुमुचे मौर्ख्यात्सतोय इव तोयदः ॥ १२॥

सङ्क्रुद्धो भगवान्नन्दी शङ्करस्यापरा तनुः ।
अब्रवीद्राक्षसं तत्र दशग्रीवमुपस्थितम् ॥ १३॥

यस्माद्वानरमूर्तिं मां दृष्ट्वा राक्षसदुर्मते ।
मौर्ख्यात्त्वमवजानीषे परिहासं च मुञ्चसि ॥ १४॥

तस्मान्मद्रूपसंयुक्ता मद्वीर्यसमतेजसः ।
उत्पत्स्यन्ते वधार्थं हि कुलस्य तव वानराः ॥ १५॥

किं त्विदानीं मया शक्यं कर्तुं यत्त्वां निशाचर ।
न हन्तव्यो हतस्त्वं हि पूर्वमेव स्वकर्मभिः ॥ १६॥

अचिन्तयित्वा स तदा नन्दिवाक्यं निशाचरः ।
पर्वतं तं समासाद्य वाक्यमेतदुवाच ह ॥ १७॥

पुष्पकस्य गतिश्छिन्ना यत्कृते मम गच्छतः ।
तदेतच्छैलमुन्मूलं करोमि तव गोपते ॥ १८॥

केन प्रभावेन भवस्तत्र क्रीडति राजवत् ।
विज्ञातव्यं न जानीषे भयस्थानमुपस्थितम् ॥ १९॥

एवमुक्त्वा ततो राजन्भुजान्प्रक्षिप्य पर्वते ।
तोलयामास तं शैलं समृगव्यालपादपम् ॥ २०॥

ततो राम महादेवः प्रहसन्वीक्ष्य तत्कृतम् ।
पादाङ्गुष्ठेन तं शैलं पीडयामास लीलया ॥ २१॥

ततस्ते पीडितास्तस्य शैलस्याधो गता भुजाः ।
विस्मिताश्चाभवंस्तत्र सचिवास्तस्य रक्षसः ॥ २२॥

रक्षसा तेन रोषाच्च भुजानां पीडनात्तथा ।
मुक्तो विरावः सुमहांस्त्रैलोक्यं येन पूरितम् ॥ २३॥

मानुषाः शब्दवित्रस्ता मेनिरे लोकसङ्क्षयम् ।
देवताश्चापि सङ्क्षुब्धाश्चलिताः स्वेषु कर्मसु ॥ २४॥

ततः प्रीतो महादेवः शैलाग्रे विष्ठितस्तदा ।
मुक्त्वा तस्य भुजान्राजन्प्राह वाक्यं दशाननम् ॥ २५॥

प्रीतोऽस्मि तव वीर्याच्च शौण्डीर्याच्च निशाचर ।
रवतो वेदना मुक्तः स्वरः परमदारुणः ॥ २६॥

यस्माल्लोकत्रयं त्वेतद्रावितं भयमागतम् ।
तस्मात्त्वं रावणो नाम नाम्ना तेन भविष्यसि ॥ २७॥

देवता मानुषा यक्षा ये चान्ये जगतीतले ।
एवं त्वामभिधास्यन्ति रावणं लोकरावणम् ॥ २८॥

गच्छ पौलस्त्य विस्रब्धः पथा येन त्वमिच्छसि ।
मया त्वमभ्यनुज्ञातो राक्षसाधिप गम्यताम् ॥ २९॥

साक्षान्महेश्वरेणैवं कृतनामा स रावणः ।
अभिवाद्य महादेवं विमानं तत्समारुहत् ॥ ३०॥

ततो महीतले राम परिचक्राम रावणः ।
क्षत्रियान्सुमहावीर्यान्बाधमानस्ततस्ततः ॥ ३१॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com